संस्कृतवार्ता:

19.03.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· सर्वोच्चन्यायालयेन अद्य नागरिकतासंशोधनाधिनियमस्य, सीएए इत्यस्य कार्यान्वयनावरोधनम् अस्वीकृतम् ।

· भाजपाया: वरिष्ठ-नेतृभि: नरेन्द्रमोदिना च अद्य राष्ट्रिय-लोकतान्त्रिक-गठबन्धनस्य प्रत्याशिनां समर्थने केरलस्य पलक्कड़-स्थले पथप्रदर्शनं विहितम्।

· जम्मू-कश्मीरे संसदीय-निर्वाचनाय सुरक्षावर्धितास्ति।

· जम्मू-विश्वविद्यालयस्य द्विदिवसीय-युवमहोत्सव: गूंज-चतुर्विंशत्यधिक-द्विसहस्रतम: अद्य प्रभृति प्रारभ्यते ।

· महाराष्ट्रस्य गढचिरौली जनपदस्य रेपनपल्ली अरण्येषु अद्य प्रात: सुरक्षा बलै: सह द्वन्द्वे चत्वार: नक्सलिन: मृता:।

· स्विस-ओपन-सुपर-३००-बैडमिण्टन् प्रतियोगितायाः चतुर्विंशत्यधिक द्विसहस्रतम-वर्षस्य संस्करणस्य आरम्भः अद्य स्विट्ज़रलैण्ड्देशस्य बेसेल्-नगरे भविष्यति ।

<u>सर्वोच्चन्यायालय:/सीएए</u>

सर्वोच्चन्यायालयेन अद्य नागरिकतासंशोधनाधिनियमस्य, सीएए इत्यस्य कार्यान्वयनावरोधनम् अस्वीकृतम्। गतसप्ताहे अधिसूचिताधिनियमस्य समाह्वाने सप्त-त्रिंशत्यधिक द्विशतं यावत् याचिकासु प्रतिक्रियां प्रददता सर्वोच्चन्यायालयेन सर्वकाराय सप्ताहत्रयं अपि प्रदत्तम्। मुख्यन्यायाधीशः डी.वाई.चन्द्रचूडः, न्यायाधीशः जे.बी.परदीवाला, न्यायाधीशः मनोजमिश्रः च अस्य विषयस्य श्रवणं कृतवन्तः।

याचिकाकर्तासु इण्डियन यूनियन मुस्लिमलीगः, काङ्ग्रेसस्य विपक्षीदलस्य नेता जयराम रमेशः, तृणमूलकाङ्ग्रेस दलस्य महुआ मोइत्रः च आसन् । अस्मिन् प्रकरणे अग्रिमः कार्याचरणं एप्रिल-मासस्य नवमे दिनाङ्के निर्धारितम् अस्ति।

<u>केरल-प्रधानमन्त्री</u>

भाजपाया: वरिष्ठ-नेतृभि: नरेन्द्रमोदिना च अद्य राष्ट्रिय-लोकतान्त्रिक-गठबन्धनस्य प्रत्याशिनां समर्थने केरलस्य पलक्कड़-स्थले पथप्रदर्शनं विहितम्। लोकसभानिर्वानस्य घोषणाया: अनन्तरं श्रीमोदिन: इदं प्रथमं पथप्रदर्शनम् अस्ति। अस्मिन् पथप्रदर्शने भारतीयजनतापार्टीति-दलस्य केरलक्षेत्रस्य-अध्यक्षेण के.सुरेन्द्रन इत्यनेन एवं पलक्कड़-पोन्नानी-संसदीयक्षेत्रेभ्य: एनडीए-प्रत्याशिभि: अपि भागं स्वीकृतम्। पथप्रदर्शनानन्तरं श्रीमोदिना तमिलनाडु-राज्यस्य सलेमस्थले एकाजनसभा अपि सम्बोधिता। तेनोदीरितं यत् पी.एम.के. इत्यनेन सह सन्धिं कृत्वा एनडीए-इत्यनेन नवोर्जा सम्प्राप्ता।

<u>जम्मू-कश्मीर-निर्वाचनं-सीएपीएफ</u>

जम्मू-कश्मीरे गृहमन्त्रालयेन केन्द्रिय-सशस्त्र-आरक्षकबलानां नियुक्ति करिष्यते। सहैव अप्रैल मासस्य एकोनविशति-दिनांकात् पंच-चरणेषु प्रारभ्यमाणानां संसदीय निर्वाचनानां निर्बाधसंचालनार्थं प्रशासनेन विभिन्नविभागीयानां आरक्षकबलानां व्यापक-संख्यायां नियोजनमपि विधास्यते। आकाशवाण्या: जम्मू-संवादात्रा एकस्मिन् प्रतिवेदने विज्ञापितं यत् संपूर्णघाट्यां एवं राजौरी-पूंछ-इत्यनयो: सीमावर्ती-क्षेत्रेषु आतंकवाद-गतिविधे: निराकरणार्थं सी-ए-पी-एफ-दलस्य प्रबन्धनं भविष्यति। भारतस्य निर्वाचनायोगेन पूर्वमेव जम्मू-कश्मीरे अर्धसैनिकबलानां पंचत्तिंशदुत्तर-षड्शतं दलेभ्य: सहमति: प्रकटितास्ति। एतस्मिन् षड्त्रिंशत्-दलानि ईवीएम-कक्षाणां मतदानकेन्द्राणां च सुरक्षार्थं स्थापयिष्यन्ते। प्रथमचरणे उधमपुर-डोडा-आसनेभ्य: अप्रैलमासस्य एकोनविंशति: दिनांकें, द्वितीयचरणे जम्मू-रियासी लोकसभाआसनेभ्य: अप्रैलमासस्य षड्विंशति: दिनांके, अनन्तनाग-पूछं-राजौरी आसनेभ्य: मईमासस्य सप्तम-दिनांके, सहैव चतुर्थचरणे श्रीनगरे मईमासस्य त्रयोदश दिनांके मतदानं भविष्यति। मईमासस्य विंशे दिनांके बारामूला-आसनेभ्य: मतदानं भविष्यति।

जम्मू-कश्मीर-युवमहोत्सव:

जम्मू-कश्मीरे यूनाम् आन्तरिक-ध्वनिं रचनात्मकतां च प्रसारयितुं जम्मू-विश्वविद्यालयेन अद्य प्रभृति द्विदिवसीय-युवमहोत्सवस्य गूंज-चतुर्विंशत्यधिक-द्विसहस्रतमस्य आयोजनं विधीयते।

आकशवाण्या: संवाददात्रा एकस्मिन् प्रतिवेदने विज्ञापितं यत् अस्य महोत्सवस्य उद्देश्य: जम्मूक्षेत्रस्य छात्राणाम् एकीकरणंम् इत्यस्ति। सममेव सांस्कृतिक-साहित्यिक-क्रीडासम्बद्ध-गतिविधीनां माध्यमेन तेषां आन्तरिकध्वनिं प्रसारयितुं एकस्य मंचस्य निर्माणम् इत्यपि अस्ति। एतस्मिन् महोत्सवे छात्रेभ्य:, शिक्षकेभ्य:, विशेषज्ञेभ्यश्च नवीन-परियोजना: उपस्थापयितुं विशेष-स्थानस्य सुविधा भविष्यति। एतदतिरिच्य कार्यक्रमस्यास्य मुख्याकर्षणम्- "कॉलेज ऑन व्हील्स-जम्मू एंड कश्मीर-ज्ञानोदय-एक्सप्रेस" इत्येतत् भविष्यति।

महाराष्ट्र-नक्सल

महाराष्ट्रस्य गढचिरौली जनपदस्य रेपनपल्ली अरण्येषु अद्य प्रात: सुरक्षा बलै: सह द्वन्द्वे चत्वार: नक्सलिन: मृता:। आरक्षि बलानुसारि आरक्षि अधीक्षकस्य यतीशदेशमुखस्य नेतृत्वे विशिष्टाभियाने सुरक्षाबलानां एकस्यदलस्यं अन्वेषणाभियानावधौ नक्सलिभि: सह द्वन्द्वम् अभवत्। महाराष्ट्र सर्वकारेण नक्सलिषु षड्त्रिंशतलक्ष रूप्यकाणां मूल्यानां पुरस्कारं घोषितमासीत्। क्षेत्रेषु अन्वेषणाभियानं जायमानं वर्तते।

पीएम-बुलागारियां राष्ट्रपति

अपहृते बल्गेरियादेशस्य पोते उद्धारकार्यं साफल्येन सम्पादनाय भारतीयनौसेनायाः आभारं प्रकटयता प्रधानमन्त्रिणा नरेन्द्रमोदिना बल्गेरियादेशस्य राष्ट्रपत्युः रुमेन रादेवस्य प्रशंसा विहिता। अद्य एकस्मिन् सामाजिकान्तर्जाल-सन्देश माध्यमेन बल्गेरियादेशस्य-राष्ट्रपत्युः सन्देशस्य उत्तरं प्रददता श्रीमोदिना उक्तं यत्, भारत- हिन्दमहासागरक्षेत्रयोः नौकायानस्य स्वतन्त्रता रक्षणाय, सागरीय-चौर्यं लुण्ठनम् आतङ्कवादं च निराकर्तुं भारतम् प्रतिबद्धम् अस्ति। सः बल्गेरियादेशस्य सप्त- नागरिकाणां सुरक्षितगृह- प्रत्यावर्तने प्रसन्नतां प्रकटितवान्। बल्गेरियादेशस्य राष्ट्रपतिना अपहृतस्य एम.वी. रूएन इति पोतात् नागरिकान् समेत्य चालकदलस्य च रक्षणाय भारतीयनौसेनायाः कृते कृतज्ञता प्रकटिता।

एनसीडब्ल्यू-मानव-तस्कर:

राष्ट्रिय-महिला-आयोगेन रेलवे-सुरक्षा-बलेन च मानव-तस्कर-प्रकरणानि निराकर्तुं नवदिल्ल्यां एकस्मिन् सन्धिज्ञापने हस्ताक्षरं विहितम्। अवसरेऽस्मिन् राष्ट्रिय-महिला-आयोगस्य अध्यक्षा रेखा शर्मा इत्येषा प्रोक्तवती यत् रेलवेस्थानेषु नियुक्तै: सुरक्षाबलै: महिला: बालकान् च विरूध्य आपराधिक-गतिविधय: निराकर्तुं महत्वपूर्ण-भूमिका आविष्क्रियते। तया कथितं यत् मानव-तस्कर-सम्बन्धानि सप्तति: प्रतिशतं प्रकरणानि बालकै: महिलाभिश्च सम्बन्धितानि सन्ति। आरपीएफ इत्यस्य महानदेशक: मनोज-यादव: प्रोक्तवान् यत् अस्य सन्धिप्रपत्रस्य उद्देश्यस्तावत् महिलानां कृते सुरक्षित यात्राया: अनुभव-प्रदानम् इत्यस्ति। तेनोदीरितं यत् आरपीएफ-दलेन महिला: विरूध्य कोऽपि अत्याचार: मा भवतु इति सुनिश्चीयते।

मौसम

भारत-ऋतु-विज्ञान-विभागेन अद्य ओडिशा-छत्तीसगढ-पश्चिमबङ्ग- झारखण्ड-राज्येषु मध्यमतः अतिवृष्टि: पूर्वानुमानिता अस्ति। तत्र उक्तं यत्, पूर्व-मध्यस्य, तत्समीपस्थस्य च प्रायद्वीपीयभारतस्य केषुचित् भागेषु गुरुवासरं यावत् हिमपातः, विद्युत् द्योतनेन सहैव वृष्टेः संभावना विद्यते । अद्य वर्षा, हिमपातस्य च तीव्रता अधिका भविष्यति। अद्य दिल्ल्यां दिवा अधिकतमं तापमानं द्वात्रिंशत् डिग्री सेल्सियसपर्यन्तं वर्धयितुं शक्यते।

स्विस ओपन बैडमिन्टन:

स्विस-ओपन-सुपर-३००-बैडमिण्टन् प्रतियोगितायाः चतुर्विंशत्यधिक द्विसहस्रतम-वर्षस्य संस्करणस्य आरम्भः अद्य स्विट्ज़रलैण्ड्देशस्य बेसेल्-नगरे भविष्यति । पुरुष-एकलविभागे सप्तमस्थाने स्थितः भारतस्य लक्ष्यसेन: द्वात्रिंशत्तमे चक्रे मलेशियादेशस्य लियोङ्ग्-जुन्-हाओ इत्यस्य विरुद्धं स्वीयाभियानस्य आरम्भं करिष्यति, किदाम्बी-श्रीकान्तः ताइवानदेशस्य वाङ्गत्सु-वेइ इत्यस्य विरुद्धं भविष्यति। महिला एकलस्पर्धायां चतुर्थस्थानस्य पी वी सिन्धुः द्वात्रिंशत्तमे चक्रे जर्मनीदेशस्य यवोन् ली इत्यनया सह द्वन्द्वं करिष्यति।

।। इति वार्ता: ।।